

।। स्वार्थोज्झिताखिलप्राणाय नमः।। ।। तादृशवेष्टिताय नमः ।।

दि. ०१/०५/२०१७



दि. ०३/०५/२०१७

१) प्रमाण ≡ प्रमेय

२) साधन ≡ फल

३) (प्रमाण=प्रमेय) ≡ (साधन=फल)

दि. ०४/०५/२०१७

१) उज्झ (त्याग) = स्वस्वत्वनिवर्तन

२) यज्ञ/दान = स्वस्वत्वनिवर्तन + परस्वत्वापादन

३) निवेदन = स्वस्वत्वअनिवर्तन+ परस्वत्वअंगीकरण

४) समर्पण = स्वस्वत्वअनिवर्तन + परार्थत्वांगीकरण

५) विनियोग = स्वस्वत्वस्यपरार्थोपयोग

अहन्ता.ममता ↓


१) ब्राह्मिकी ⟷ चिदंशगत

२) पारमात्मिकी ⟷ जैवात्मिका (अनात्मिकत्यागौपयिक)

३) भागवती ⟷ भक्तात्मिका (दान + निवेदनात्मिका)

४) कार्ष्णी ⟷ कृष्णे निरोधात्मिका

५) अपने घरके ठाकुरसु जुड़ी ⟷ समर्पित विनियोगात्मिका




त्याग= न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमाशु: (महाना.९।१४)

दान=त्रयोधर्मस्कन्धा: यज्ञोऽध्ययनं दानं प्रथमस्तपएव द्वितीयो ब्रह्मचारीआचार्यकुलवासी तृतीये अत्यन्तम् आत्मानम् आचार्यकुले अवसादयन् एते पुण्यलोका: भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति
(छान्दो.उप.२।२२)

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन एतमेव प्रव्राजिनो लोकमिच्छन्त: प्रजां न कामयन्ते किं प्रजया करिष्यामो येषामयमात्मा अयं लोक: (बृहद्.उप.५।४)


समर्पण=सवा अयमात्मा सर्वेषां भूतानामधिपती: राजा तद्यथा रथनाभौ चारा: सर्वे समर्पिता एवमेव एषा एतस्मिन् सर्वाणि भूतानि सर्वे देवा: सर्वे लोका: सर्वे प्राणा: सर्वएव त आत्मान: समर्पिता:
(बृहद्.उप.२।५।१५)

विनियोग=योहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि
(महानारा.उप.५।१०)

ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगद् तेन त्यक्तेन भुञ्जिथा मा गृध: कस्यस्विद् धनं
(ईशावास्योपनिषद्. १)

आप्यायन्तु ममांगानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्या मा मा ब्रह्म निराकरोद् अनिराकरणमस्त्वनिराकरणं मेऽस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु (केनोपनिषद् उपसंहार)

स्वार्थोज्झिताखिलः ... 'यज्' देवपूजासंगतिकरणदानेषु दि. ०७/०५/२०१७




१) यागो देवताम् अपेक्षते, देवताश्च यागं अपेक्षन्ते, यागमन्तरेण सम्भवन्तीति.

२) यागो देवतासिद्ध्यर्थम् अपेक्षते तयोः उभयोः एकांगविकलयोः सम्बन्धो भवति.

३) यो देवतोद्देशेन द्रव्यं त्यजति तेन यागो अनुष्ठितो भवति, न त्यागमात्रेण कृतो भवति.

४) यागं विना द्रव्यदेवतयोस्तु संयोगो न कथमपि सिद्ध्यति

५) एकदेशेनापि त्यज्यमानं हूयमानं सर्वमिदं हुतं द्रव्यं भवति यागं साधयति

६) यागो यथेष्ट विनियोज्यत्वलक्षणस्वत्वरूपत्यागात्मकः

७) देवतोद्देशेन स्वत्वत्यागमात्रं यागः ∴ द्रव्यदेवतासंगमनात्मकः (गंगात्वं सर्वदोषाणां)

८) ''ब्रह्मार्पणं ब्रह्महवि ...'' साधारण्यं यागसमर्पणयो

समर्पण

- माहात्म्यमूलक
  - भीतिद्वारक त्यागात्मक
  - विरतिद्वारक दानात्मक
  - रतिद्वारक तादर्थ्योपयोजनात्मक
- तादात्म्यमूलक
  - सिद्ध
    - अभेदमूलक अव्युच्चरित बिन्दु सिन्धु न्यायेन बीजफलवत्
    - भेदमूलक नदी सिन्धु न्यायेन आत्म-प्रविलापनात्मक
    - उभयातीत तादात्म्यमूलक अंगांगिभावेन इतरेतरार्थ अवस्थानात्मक
  - साध्य
    - प्रमाणकोटिक आत्मनिवेदनात्मक
    - साधनकोटिक आत्मीयसहित आत्मविनियोगात्मक
    - फलकोटिक इतरेतरार्थ रतिरूप नैर्भर्यात्मक

१) स्वार्थोज्झिताखिलप्राणप्रियः ∴ तादृशवेष्टितः (?)

२) स्वार्थोज्झिताखिलप्राणप्रियः ∵ तादृशवेष्टितः (✓)

## Judaism

Let all your deeds be done for the sake of Heaven (Mishnah Abot 2.17 )
Whether we bring much or little it matters not if only we fix our heart upon our Father in heaven (Talmud Berakot 17 )

## The dedication of Church

The Rite of dedication of Church presents a comprehensive vision of God. The theological image of God in the rite is clearly trinitarian. The preface proclaims a universal presence of God in which the whole world is God's temple shaped to resound to God's name such an affirmation of the goodness of creation crosses the dichotomy between the sacred and profane. The Church is not a refuse for God's holiness against a world which is diametrically opposed to God. The world like Church is icon of the sovereignty and creature goodness of God.

The Christology of the Rite understands Christ as perfect temple who by death and resurrection gathered a people to be his own. Body of Christ is proclaimed a temple consecrated to God's glory like Christ people praying becomes temple of Christ. Entrance intersection between profane and sacred then 12 apostals upon whom church founded. A house of salvation and grace where Christians gathered in fellowship may worship you in spirit of and truth and grow together in love. (James Nate baart )

## Catholism

To Him we owe the service which is called in greek latreia whether we render it outwardly or inwardly. To him we offer the sweetest incense whom we come before Him burning with holy and pious love, to Him we devote and surrender ourselves and His gifts in us, to Him by solemn feasts and on appointed days we consecrate our memory. It is that we may see Him, so far as He can be seen. It is that we may cleave to Him that we are cleansed from all stain of sins and evil passions and are consecrated in His name. For He is fountain of our happiness. He is end of our all desires. Being attached to Him or rather let me say reattached for we had detached ourselves and lost hold of Him and for our good about which philosophers have so keenly contented is nothing else then to be united to God. (The City Of God, Volume I, Chapter 10)

Joy can have its source six kinds of objects or goods : temporal, natural, sensory, moral, supernatural and spiritual.

1. reaches, status, children, relation etc..

2. beauty, grace, elegance, talents etc..
3. sense of sights, hearing, smell, taste and touch
4. observance of gods law extremely good manners
5. all the gifts of God that exceed our natural faculties and powers, wisdom faith grace.

(The ascent of Mount Carmel, Chapter 45)

Whatever you do all to the glory of God (Corinthians 10|31 )
यत् करोषि यदश्नासि यत् पिबसि तत् कुरुष्व मदर्पणम् (कुरिन्थ १० ।३१)
अपने सभी कार्यों प्रभुको समर्पित करो (सूक्ति.१६ ।३)

Each one must do as he made up his mind not reluctantly or under compulsion for God loves a cheerful giver (Corinthians 9|7-9)


## इस्लाम

१) लन्तना लुल्बिर्र हत्ता तुनफ़िक्र तुहिब्बुन
जब तक प्रिय पदार्थोका परमेश्वरके वास्ते विनियोग नहीं करोगे तब तक कथमपि कल्याण होनेवाला नहीं है.

मा तुन फिक्मिन् शैइन फ इन्नल्लाह बिह अलिमुन
और जो तुम खर्च करते रहते वह अल्लाहको खूब मालूम है.

(सूरा अलिइम्रान)

२) (अ)



खुदाका नाम ही पेगाम ये देता है ये बन्दोको कि तु आ खुद मुझे ले खोज कि हर सिम्तमें मैं हूं
दीनो–कुफ्र मोमिनो–मुन्कीर जन्नतो–दोज़क जुदा इल्मेनुक़्ता हो अगर तो क्यों न बनजाये खुदा.

## सूफी

(आ) १७५ सम्प्रदाय : विस्तासिया बख्ताशिया नक़्शबन्दिया कादरिया चिश्तिया सुहरावर्दिया जाबीरी etc.

फनाहेखुद/फनाहेखुदी ℅ (काफिर/मुन्किरन) → (ईमां/रहम)

करम → काफिर/मुन्किर → ईमा

खुदी  खुफ्रस्त अगर खुद पारसाईस्त खराबाती शुदन अज़ खुदरिहाईस्त

(इ) अय दवाए निख़वती नामूसे मा (=प्रेम) (भक्ति: पुनाति मन्निष्ठा अघं घुन्वन्ति कात्स्न्येन.)
अय् तबीबे जुम्ला इल्लत हा ए मा हरकिरा जामा ज़े इश्क चाकशुद
उ ज़े हिर्से हवस एबे कुल्ली पाक शुद
नै तुरा दर्का रे मन आबुर्दह अम (मत्सेवार्थं मया ना आहूत: किम्)
नै कि मन् मशगुले ज़िकरत कर्दह अम (मन्नाम्नि मया किं न तल्लीनो कृत:?)
गुफ्त आँ अल्लाहे तो लब्बैके मास्त (त्वत्कृत संबोधने मत्कृतांगीकृति किं नास्ति)
ईं न्याज़े सोज़े दर्दत  मैके मास्त ( मत्कृते तव तापक्लेशौ मन्मेलको दूतो न अभवत् किम्?)
(४) इश्क़े जाना आतशस्तो अक्ल बूद
इश्क़ कामद दरगुरजेद अक्ल ज़ूद
अक्ल दरसोदाए इश्क़ उस्ताद नेस्त
इश्क़ कारे अक्ल मादरज़ात नेस्त (अत्तार)

ज़े खत्ते वहमिए हाए हुवीयत् (अद्वैतभ्रमाद् उत्तिष्ठ)
दुचश्मी मी शबद दर वक़्ते रोयत्
(द्रष्टु: दृष्टिद्वयमिष्टं दर्शनकाले)
जनाबे हज़रते हक़्रा दुई नेस्त
दर आँ हज़रत मनो मा तुई नेस्त
मनो मा तूओ ऊ हस्त यक चीज़
कि दरु वहदत न बाशद हे च तमीज़

अज़ा जानिब बुवद ई जादो तक़मिल
कज़ा जानिब बुवद हर लहज़ा तब्दिल
(तस्य सनातनी रचनाशीलता सृष्टेः सनातनी स्रष्टुः परिवर्तनशीलता)

मुरक्काते दरवेश = विरहानुभवार्थन्तु परित्यागो प्रशस्यते. स्वीयबन्धनिवृत्यर्थं वेशः सोऽत्र नचान्यथा

चन्दॉ मर्दे ई रह के दुई बरखेजद गरनेस्त दुइ जे रहरवी बरखेजद
तू उ न शबी उ लेक गर जेहद्कुनी जाए बेरसे कज़ न तुई बरखेजद
वलेता बाखुदी ज़िनहार ज़िनिहार इबाराते शरीयत रा निगहदार्
हमां हुक्मो शरीअत अज़ मनो तूस्त फि ऑ बर बस्तए जानो तने तूस्त
मनो तू गर न मानद दरमियाना ये मस्जिद चे कनिश्त ये देरखाना (शबस्तरी)

महवे तस्बी तो सब हैं पर इदरात कहां
जिंदगी खुद ही इबाबत हो सकती है पर होश कहां!

## श्लोक सन्दर्भ

एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तये अबला: ।
मया परोक्षं भजता तिरोहितं मासूयितुं मार्हथ तत् प्रियं प्रिया: ।। भाग.पुरा.१०।२९।२१

फलत: साधनेभ्यश्च प्रमेयाच्च प्रमाणत: विचारेण अबृहद् तत् चेद् कोऽन्य: साधयितुं क्षम:
(अणुभाष्य ३।२।३१)

प्रकाशाश्रयवद् वा तेजस्वात् ।
[ ०°० काल स्मभाव तपां श्रद्धा विज्ञान अविज्ञान यज्ञ दान लीला ]

### काल

यावत्यो वै कालस्य कला: तावतीषु चरति असौ य: कालं ब्रह्म इति उपासीत काल: तस्य अतिदूरम् अपयाति. कालात् स्रवन्ति भूतानि कालाद् वृद्धिं प्रयान्ति च काले च अस्तं नियच्छन्ति कालो मूर्ति: अमूर्तिमान्. द्वे वाव ब्रह्मणो रूपे कालश्च अकालश्च. य: प्राग् आदित्यात् सो अकाल: अकल:. अथ य आदित्याद्या: स काल: सकल: सकलस्य वै तद् रूपं यत् संवत्सर:. संवत्सरात् खलु इमा: प्रजा: प्रजायन्तो संवत्सरेण जाता: विवर्धन्ते संवत्सरे प्रत्यस्तं यान्ति. तस्मात् संवत्सरो वै प्रजापति:. काल पचन्ति भूतानि सर्वाण्येव महात्मनि यस्मिंस्तु पच्यते काल: यस्तं वेद स वेदवित् (मैत्रा.ब्राह्म.५।१५)

### स्वभाव

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभु:
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।।१४।।
नादत्ते कस्यचित् पापं न चै सुकृतं विभु:
अज्ञानेन आवृतं ज्ञानं तेन मुह्यन्ति जन्तव: ।।१५।।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन:
तेषामादित्यवद् ज्ञानं प्रकाशयति तत्परं ।।१६।।
तद्बुद्धय: तदात्मान: तन्निष्ठा: तत्परायणा:
गच्छन्ति अपुनरावृत्तिं ज्ञाननिर्धूतकल्मषा: ।।१७।।
विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि
शुनि चैव श्वपाके च पण्डिता: समदर्शिन: ।।१८।।

इहैव तैर्जित: सर्गो येषां साम्ये स्थितं मन:
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिता: ।।१९।। (भग.गीता.१४-१९)

## तप:

प्रजापतिरकामयत् प्रजायेय इति स तपो अतप्यत्. तपसा देवा देवताम् अग्रे आयन् तपसा ऋषय: स्व: अविदिन तपसा सपत्नान् प्रणुयाम अराती: (अयन) प्रथमजं देवं हविषा विधेम स्वयंभु ब्रह्म परमं तपो यत् स एव पुत्र स पिता स माता तपो यक्ष: प्रथमं संबभूव.
(तैत्ति.ब्राह्मण.२।२।३।१, ३।१२।३।१)

## श्रद्धा

श्रद्धया देवो देवत्वम् अश्नुते श्रद्धा प्रतिष्ठा लोकस्य देवी सा जुषाणा उप यज्ञम् आगात् कामवत् सा अमृतं दुहाना. श्रद्धा देवी प्रथमजा ऋतस्य विश्वस्य भर्त्री जगत: प्रतिष्ठा. तां श्रद्धां हविषा यजामहे सा नो लोकम् अमृतं दधातु ईशान देवी भुवनस्य अधिपत्नी याज्ञिका (तैत्ति.आर.३।१२।३)

## विज्ञान

तस्माद् वा एतस्माद् प्राणमयाद् अन्योन्तर आत्मा मनोमय तस्य यजुरेव शिर: ऋग्दक्षिण: पक्ष: सामोत्तर पक्ष आदेश आत्मा अथर्वगीरस: पुच्छं प्रतिष्ठा यतो वाचो निर्वतन्ते अप्राप्य मनसा आनन्दं ब्रह्मणा विद्वान न बिभेति कदाचनेति. तस्माद् वा एतस्माद् मनोमयाद् अन्योन्तर आत्मा विज्ञानमयं तस्य श्रद्धैव शिर: ऋतं दक्षिण: सत्यमुत्तर: पक्ष: योग आत्मा मह: पुच्छं प्रतिष्ठा विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि विज्ञानं देवा: सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद् वेद तस्मात् चेन्न प्रमाद्येति शरीरं पाप्मनो हित्वा सर्वान् कामान् समश्नुते इति. तस्माद् एतस्माद् विज्ञानमयाद् अन्योऽन्तर आत्मानन्दमय: तस्य प्रियमेव शिर: मोदो दक्षिण: प्रमोद उत्तरपक्ष आनन्द आत्मा ब्रह्म पुच्छं प्रतिष्ठा. असन्नेव स भवति असद् ब्रह्मेति चेद् वेद सन्तमेनं ततो विदु: … सोऽकामयत बहुस्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा सर्वमसृजत. यदिदं किञ्च तत्सृष्ट्वा तदेवानुप्राविशत्. तदनुप्रविश्य सच्च त्यच्चाभवत्. निरुक्तं चानिरुक्तं च. निलयनं चानिलयनं च. विज्ञानं चाविज्ञानं च.
(तैत्ति.उप.२।२-५)

इन्द्रो मायाभि: पुरुरूपो ईयते युक्ता ह्यस्य हरय: शता सहस्रं (बृहदा.उप.२।५।१९)

## अविज्ञान

नासदासीन्नोसदासीत तदानीं नासीद् रजो नो वयोमापरो यत्. किमावरीव: कुह कस्य शर्मन अम्भ: किमासीद् गहनं गभीरं न मृत्यु: अमृतं तर्हि रात्रिया अह्न आसीत् प्रकेत: आनीद् अवातं स्वधया तदेकं तस्माद् हि अन्यं न किञ्चन आस:. तम: आसीत् तमसा गूढम् अग्रे अप्रेकतम्. सलिलं सर्वम् आ इदम् तुच्छयेन आभु अविहितं यदा आसीत् तमस: तद् महिना जायतेकम् कामस्तदग्रे समवर्त आधि मनसो रेत: प्रथमं यद् आसीत् सतो बन्धुम् असति निरविन्दन् हृदि प्रतीष्या कवयो मनीषां को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टि: यत आबभूव यदि वा दधे यदि वा न दधे योस्याध्यक्ष परमे व्योमन सांग वेद यदि वा न वेद.

(ऋक्.संहि.१०।१२९।१–१४)

किंस्विद् वनं नतु स वृक्ष आसीद् ब्रह्म वन ब्रह्म स वृक्ष आसीत्

(तैत्ति.ब्रा.२।८।९।६)

अन्धन्तम: प्रविशन्ति ये अविद्यायामुपासते ततो भूय इव ते तमो य उ विद्यायां रता: विद्यां च अविद्यां च यस्तद् वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते.

(ईशावास्योपनिषद्. ११)

०%० यस्यामतं मतं तस्य मतं यस्य न वेद स अविज्ञातं विजानतां विज्ञातमपि जानतां

(केनोपनिषद् २।३)

## यज्ञ

प्रजापतिरकामयतप्रजायेय स एतं दशहोतारं (यज्ञं) अपश्यत (तैत्ति.आर.२।९।४)

## मन्त्र: कर्म च सएव

कर्म च तदेव ऋतं तदु सत्यम् आहु: स एव तदेव ब्रह्म परमं कवीनाम् इष्टापूर्त बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभि: (महानारायणोपनिषद् १।६)

## कर्मदेवता स:

कर्म तदेव अग्नि तद् वायु: तत्सूर्य: तदुचन्द्रमा देवता तदेव शुक्रम् अमृतं तद् ब्रह्म तद् आप: मां स प्रजापति: (महानारायणोपनिषद् १।७)

**मन्त्रेपि सः**

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषाद् अधिकलाः मुहूर्ताः काष्ठास्याहोरात्राश्च सर्वशः अर्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम् (महानारायणोपनिषद् १।९)

**देश कर्ता सः**

वेनः तत् पश्यन् विश्वा भुवनानि विद्वान् यत्र विश्वं भवत्येकनीडम् यस्मिन्निदं सं च विचैकं स ओतः प्रोतश्च विभुः प्रजासु (महानारायणोपनिषद् १।१६)

कालोऽव्येका भगवतः शक्तिः मर्यादारूपा सा सृष्टिकालं प्रबुध्यते अन्यास्तु भगवता प्रबोध्यन्ते
(सुबो. ३।६।२)

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेऽपि मामेव कौन्तेय! यजन्त्यविधिपूर्वकम्।।२३।।
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु माम् अभिजानन्ति तत्त्वेनातश्च्यवन्ति ते।।२४।।
यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः।भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्।।२५।।
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः।।२६।।
यत् करोषि यद् अश्नासि यज् जुहोसि ददासि यत्। यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्।।२७।।
शुभाशुभ फलैरेवं मोक्ष्यसे कर्मबन्धनैः। संन्यासयोगयुक्तात्मा विमुक्तो माम् उपैष्यसि।।२८।।
समोऽहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः। ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।।२९।।
(भग.गीता.९।२३-२९)

यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय! मुक्तसंगः समाचर।।९।।
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वम् एष वोऽस्त्विष्टकामधुक्।।१०।।
देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।११।।
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। तैर् दत्तान् अप्रदायैभ्यो यो भुंक्ते स्तेनएव सः।।१२।।
यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बषैः। भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्।।१३।।
अन्नाद् भवन्ति भूतानि पर्जन्याद् अन्नसम्भवः। यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः।।१४।।

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।१५।।
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति।।१६।।
यस्त्वात्मरतिरेव स्याद् आत्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्य कार्यं न विद्यते।।१७।।
(भग.गीता.३।९-१७)

ब्रह्मार्पणं ब्रह्म हविर् ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना।।२४।।
दैवमेवापरे यज्ञं योगिनः पर्युपासते। ब्रह्मग्नावपरे यज्ञं यज्ञनैवोपजुह्वति।।२५।।
श्रोत्रादीन् इन्द्रियाण्यन्ये संयमाग्निषु जुह्वति। शब्दादीन् विषयान् अन्ये इन्द्रियाग्निषु जुह्वति।।२६।।
सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे। आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते।।२७।।
द्रव्ययज्ञाः तपोयज्ञा योगयज्ञाः तथाऽपरे। स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः।।२८।।
अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे। प्राणापानगती रुद्ध्वा प्राणायामपरायणाः।।२९।।
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति। सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः।।३०।।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्। नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम!।।३१।।
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे। कर्मजान् विद्धि तान् सर्वान् एवं ज्ञात्वा विमोक्ष्यसे।।३२।।
श्रेयान् द्रव्यमयाद् यज्ञात् ज्ञानयज्ञः परन्तप! । सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यते।।३३।।
तद् विद्धि प्रणिपातेन परिप्रश्नेन सेवया । उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनः तत्त्वदर्शिनः।।३४।।
(भग.गीता.४।२४-३४)

त्याज्यं दोषवद् इत्येके कर्म प्राहुर् मनीषिणः। यज्ञ-दान-तपः कर्म न त्याज्यम् इति चापरे।।३।।
निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!। त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः।।४।।
यज्ञ-दान-तपः-कर्म न त्याज्यं कार्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।५।।
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च। कर्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्।।६।।
(भग.गीता.१८।३-६)